पिशाचाश्च राक्षसाः क्रूररूपिणः। हरन्ति रसमन्नस्य मण्डलेन विवर्ज्जितम् का॰ख॰। नोत्सङ्गे भाजनं कृत्वा नो पाणौ नैव कर्पटे। नासने न च शय्यायां भुञ्जीत न मलार्दितः” का॰ख॰”। “नारिकेलोदकं कांस्ये ताम्रपात्रे गुड़स्तथा। सुरातुल्यं भवेदेतत् ताम्रे गव्यं घृतं विनेति आ॰त॰पुरा॰।‘वर्जनीयं सदा माघे मूलकं मदिरासममिति” ब्र॰पु॰। सदा विप्रैरिति विधानपा॰ पाठः। “वट्प्लक्षोदुम्बरनीपदधित्थमातुलङ्गानि न भक्षयेत्” हारी॰ दधित्थः कपित्थः। कालान्तरेऽपि द्रव्यान्तर निषेधः “आमिषं चुक्रशाकञ्च योभुङ्क्ते च रवेर्द्दिने सप्तजन्म भवेत् कुष्ठी दरिद्रश्चोपजायते। स्त्रीतैलमांससंभोगी पर्वस्वेतेषु वै पुमान्। विण्मूत्रभोजनं नाम नरकं प्रतिपद्यते” वि॰पु॰। अथ तिथिविशेषे द्रव्यविशेषाभक्ष्यतामाह स्मृतौ “कुष्माण्डे चार्थहानिः स्यात् वृहत्यां न स्मरेद्धरिम्। बहुशत्रुः पटोले स्यात् धनहानिस्तु मूलके। कलङ्की जायते बिल्वे तिर्य्यग्योनिश्च निम्बके। ताले शरीरनाशःस्यान्नारिकेले च मूर्खता। तुम्बी गोमांसतुल्या स्यात् कलम्बी गोबधात्मिका। शिम्बी पापकरी प्रोक्ता पूतिका ब्रह्मघातिका। वार्त्ताकौ सुतहानिः स्याच्चिररोगी च माषके। महापापकरं मांसं प्रतिपदादिषु वर्जयेत्” षट्त्रिं॰। तत्र सप्तम्यामेव तालनिषेधादन्यत्र भक्षणं प्राप्तम्। अतः ‘तालं श्वेताञ्च वार्त्ताकीं न खादेद्वैष्णवो नरः’। इत्यनेन तालमपि श्वेतं निषिद्धं साहचर्य्येण श्वेतानुषङ्गात्। “अलाबूं वर्त्तुलाकारां वार्त्ताकीं कुन्दसन्निभाम्”” ति॰त॰ पु॰ यदपि ‘कुसुम्भनालिकाशाकं वृन्ताकं पूतिकान्तथा। भक्षयन् पतितस्तु स्यादपि वेदान्तगो द्विजः’ इत्युशनसा सामान्यतोऽभिहितम्। तदपि श्वेतवृन्ताकपरम्। तत्र नालिकाश्वेतकलम्बी। पूतिका द्वादश्यामधिकदोषाय शूद्रविषयिकावा इति ति॰त॰रघु॰।

कुष्माण्डं २वृहतीफलन्तु ३लवणं वर्ज्यं ४तिलाम्लं तथा ५तैलं ६चामलकं ७दिवं प्रवसता ८शीर्षं ९कपालान्त्रकम् १०। ११निष्पावाश्च १२मसूरिकाफलमथो १३वृन्ताक संज्ञं १४मधु द्यूतं १५स्त्रीगमनं क्रमात् प्रतिपदादिष्वेवमाषोड़श। नि॰सि॰सु॰दीपि॰। शीर्षं नारिकेलम् कपालं अलाबूः अन्त्रकं पटोलम्। ‘१कुष्माण्डं २ वृहती ३ क्षारं ४ मूलकं ५ पनसं ६ फलम्। ७ धात्री ८ शिरः ९ कपालान्त्रं १० ११नख १२ चर्म १३ तिलानि च १४ क्षुरकर्म्माङ्गनासेवां १५ प्रतिपदादिषु वर्ज्जयेत् नि॰सि॰भूपालः। नखं शिम्बी चर्म मसूरिका। “उच्छिष्टस्यान्नमात्रस्याभक्ष्यता “उच्छिष्टमगुरोरभोज्यं स्वोच्छिष्टमुच्छिष्टाहृतञ्च” शाता॰। गुरुः पित्रादिः। ‘पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोज्यम्’, आप॰ मातापितृभ्यां संभुक्तं शेषं वा ब्रह्मचारिणः” ब्र॰पु॰। स्वमुच्छिष्टन्तु यो भुङ्क्ते यो भुङ्क्त्यक्तभाजने एवं वैवस्वतः प्राह भुक्त्वा चान्द्रायणं चरेत्” चतुर्व्विंशमतम्। “नाश्नीयात् भार्य्यया सार्द्धं नाश्नीयादुत्कटासने” मनुना स्त्रिया सह भोजननिषेधेऽपि अध्वनि ब्राह्मण्या स्त्रिया सह भोक्तुंशक्यते। “ब्राह्मण्या हितया सार्द्धं कचिद्भुञ्जीत चाध्वनि। अधोवर्णस्त्रिया सार्द्धं भुक्त्वा चान्द्रायणं चरेत्” ब्र॰पु॰। एतद्विषय एव “ब्राह्मण्या वा सहाश्नीयादुच्छिष्टं न कथञ्चन। न तत्र दोषं मन्यन्ते” अङ्गिराः। विड़ालाद्युच्छिष्टस्याभक्ष्यता। ‘विड़ालकाकाद्युच्छिष्टं जग्ध्वा श्वनकुलस्य च। केशकीटापन्नञ्च पिबेत् ब्रह्मसुवर्च्चलाम्” मनुः। “दूषितं केशकीटैश्च मार्ज्जारैर्मूषिकैस्तथा। मक्षिकामशकश्चैव त्रिरात्रेण विशुध्यति। श्वकाकगोभिरुच्छिष्टभक्षणे तु दिनत्रयम्” मनुः अत्रापवादः। “देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृतेषु च काकैः श्वभिश्च संस्पृष्टमन्नं तन्न विवर्ज्जयेत्। तन्मात्रमन्नमुद्धृत्य शेषं संस्कारमर्हति” यमः। संस्कारश्च “घनानां प्रोक्षणाच्छुद्धिः द्रवाणामपि तापनात्। संस्पर्शात्तु भवेच्छुद्धिरपां प्राह्नुष्ट तस्य च छागस्य मुखसंस्पृष्टं शुचि चैव हि तद्भवेत्” यमः। “पक्षिश्वापदजग्धस्य रसस्यान्नस्य भूयसः। संस्काररहितस्यापि भोजने पादकृच्छ्रकम्” विष्णुः। कुत्सितशूद्रादिपङ्क्तिभोजननिषेधात्तत्रान्नमात्रस्याभक्ष्यता “यस्तु पङ्क्तिषु भुञ्जीत कुत्सितानां विशेषतः अहोरात्रोषितः स्नात्वा पञ्चगव्येन शुध्यति” अङ्गि॰। “अपाङ्क्तेयब्राह्मणोपवेशनेन कुत्सितासु। जलादिना पङ्क्तिभेदनमन्तरेणेत्याचारः प्रा॰वि॰। “ब्राह्मणः क्षत्रियपङ्क्त्यामुपविश्यासंस्पृशन् यदा भुङ्क्ते तदा नक्तमाचरेत्। वैश्यपङ्क्त्यामेकरात्रं शूद्रपङ्क्त्यां त्र्यहमाचरेत्” विष्णुः। अनिन्दितपङ्क्तिष्वपि सहभोजने एकस्योत्थाने तदन्नस्याभक्ष्यता ‘एकपङ्क्त्युपविष्टानां विप्राणां सहभोजने। यद्येकोऽपि त्यजेत् पात्रं शेषमन्नं न भोजयेत्। मोहात् भुङ्क्ते तु यः पङ्क्त्यामुच्छिष्टं सहभोजने। प्रायश्चित्तं चरेद्विप्रः कृच्छ्रं सान्तपनं तदा” शङ्खः। कालविशेषे द्रव्यमात्रस्य अभक्ष्यता। “सूर्य्यग्रहे तु नाश्नीयात् पूर्व्वं यामचतुष्टयम्। चन्द्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विना” वृद्ध॰गौ॰। ‘ग्रहणं तु भवेदिन्दोः प्रथमादधि यामतः भुञ्जी-